॥श्रीगणेशायनमः॥श्रीमत्पांडुरंगायनमः॥ॐ
यस्यस्मरणमात्रेणजन्मसंसारबंधनात्॥
विमुच्यतेनमस्तस्मैविष्णवेप्रभविष्णवे॥१॥
वैशंपायनउवाच॥श्रुत्वाधर्मानशेषेण

पावनानिचस
र्वशः॥युधिष्ठिरः
शांतनवंपुनरेवा
भ्यभाषत॥२॥यु
धिष्ठिरउवाच॥

किमेकंदैवतंलोके किंवाप्येकंपरायणं ॥ स्तु
वंतः कंकमर्चंतः प्राप्नुयुर्मानवाः शुभं ॥ ३ ॥
कोधर्मः सर्वधर्माणां भवतः परमोमतः ॥ किं
जपन्मुच्यते जंतुर्जन्म संसारबंधनात्
४ ॥ भीष्मउवाच ॥ जगत्प्रभुंदेवदेवमनंतं
पुरुषोत्तमं ॥ स्तुवंनामसहस्रेण पुरुषः स
ततोत्थितः ॥ ५ ॥ तमेवचार्चयन्नित्यंभक्त्या
पुरुषमव्ययं ॥ ध्यायंस्तुवन्नमस्यंश्च यज
मानस्तमेवच ॥ ६ ॥ अनादिनिधनंविष्णुंस

र्वलोकमहेश्वरं ॥ लोकाध्यक्षंस्तुवन्नित्यंस
र्वदुःखातिगोभवेत् ॥ ७ ॥ ब्रह्मण्यंसर्वधर्मज्ञं
लोकानांकीर्तिवर्द्धनं ॥ लोकनाथंमहद्भूतं
सर्वभूतभवोद्भवं ॥ ८ ॥ एषमेसर्वधर्माणां ध
र्मोधिकतमोमतः ॥ यद्भक्त्यापुंडरीकाक्षंस्त
वैरर्चेन्नरः सदा ॥ ९ ॥ परमंयोमहत्तेजः परमं
योमहत्तपः ॥ परमंयोमहद्ब्रह्म परमंयः परा
यणं ॥ १० ॥ पवित्राणांपवित्रंयोमंगलानांच
मंगलं ॥ दैवतंदेवतानांच भूतानांयोव्ययः

पिता ॥११॥ यतः सर्वाणि भूतानि भवंत्यादियुगा
गमे ॥ यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये ॥
१२ ॥ तस्य लोकप्रधानस्य जगन्नाथस्य भूप
ते ॥ विष्णोर्नामसहस्रं मे शृणु पापभयापहं ॥
१३ ॥ यानि नामानि गौणानि विख्यातानि म
हात्मनः ॥ ऋषिभिः परिगीतानि तानि वक्ष्या
मि भूतये ॥ १४ ॥ अस्य श्रीविष्णोर्दिव्यसहस्र
नामस्तोत्रमंत्रस्य ॥ श्रीवेदव्यास ऋषिः ॥ अनु
ष्टुप् छंदः ॥ श्रीकृष्णः परमात्मा देवता ॥ अमृतां

शूद्भवो भानुरिति बीजं ॥ देवकीनंदनः स्रष्टे
ति शक्तिः ॥ उद्भवः क्षोभणो देव इति मंत्रः ॥ शं
खभृन्नंदकी चक्रीति कीलकं ॥ शार्ङ्गधन्वा
गदाधर इत्यस्त्रं ॥ त्रिसामा सामगः सामेति
कवचं ॥ विश्वं विष्णुर्वषट्कार इति ध्यानं ॥ श्रीपर
मेश्वरप्रीत्यर्थे विष्णोर्दिव्यसहस्रनामस्तोत्र
जपे विनियोगः ॥ ॐ विश्वं विष्णुर्वषट्कार इत्यं
गुष्ठाभ्यां नमः ॥ ॐ अमृतांशूद्भवो भानुरिति
तर्जनीभ्यां नमः ॥ ॐ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति

वि॰ मध्यमाभ्यांनमः॥ ॐसुवर्णबिंदुरक्षोभ्य इत्य
नामिकाभ्यांनमः॥ ॐआदित्योज्योतिरादित्य
इतिकनिष्ठिकाभ्यांनमः॥ ॐशार्ङ्ग·धन्वागदा
धरइतिकरतलकरपृष्ठाभ्यांनमः॥ ॐविश्वंवि
ष्णुर्वषट्कारइतिहृदयायनमः॥ ॐअमृतांशूद्भ
वोभानुरितिशिरसेस्वाहा॥ ॐब्रह्मण्योब्रह्मकृ
द्ब्रह्मेतिशिखायैवषट्॥ ॐसुवर्णबिंदुरक्षो
भ्य इतिकवचायहुं॥ ॐआदित्योज्योतिरा
दित्यइतिनेत्रत्रयायवौषट्॥ ॐशार्ङ्ग·धन्वा ३

गदाधर इत्यस्त्रायफट्॥ ध्यानं॥ शांताकारंभु
जगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनस
दृशंमेघवर्णंशुभांगं॥ लक्ष्मीकांतंकमलनय
नंयोगिभिर्ध्यानगम्यंवंदेविष्णुंभवभयहरंस
र्वलोकैकनाथं॥ ॐविश्वंविष्णुर्वषट्का
रोभूतभव्यभवत्प्रभुः॥ भूतकृद्भूतभृद्भावोभू
तात्माभूतभावनः॥१॥ पूतात्मापरमात्माचमु
क्तानांपरमागतिः॥ अव्ययःपुरुषःसाक्षी
क्षेत्रज्ञोऽक्षरएवच॥२॥ योगोयोगविदांनेता

वि०

प्रधानपुरुषेश्वर॥ नारसिंहवपुःश्रीमान्केश
वःपुरुषोत्तमः॥३॥ सर्वःशर्वःशिवःस्थाणुर्भू
तादिर्निधिरव्ययः॥ संभवोभावनोभर्ताप्रभव
प्रभुरीश्वरः॥४॥ स्वयंभूःशंभुरादित्यःपुष्क
राक्षोमहास्वनः॥ अनादिनिधनोधाताविधा
ताधातुरुत्तमः॥५॥ ~~अनादिस्यःपुष्कराक्षोम~~
अप्रमेयोहृषीकेशःपद्मनाभोमरप्रभुः॥ वि
श्वकर्मामनुस्त्वष्टास्थविष्ठःस्थविरोध्रुवः
॥६॥ अग्राह्यःशाश्वतःकृष्णोलोहिताक्षःप्र ४

तर्दनः॥ प्रभूतस्त्रिककुप्धामपवित्रंमंग
लंपरं॥७॥ ईशानःप्राणदःप्राणोज्येष्ठःश्रेष्ठः
प्रजापतिः॥ हिरण्यगर्भोभूगर्भोमाधवोमधु
दनः॥८॥ ईश्वरोविक्रमीधन्वीमेधावीविक्र
मःक्रमः॥ अनुत्तमोदुराधर्षःकृतज्ञःकृतिरा
त्मवान्॥९॥ सुरेशःशरणंशर्मविश्वरेताः
प्रजाभवः॥ अहःसंवत्सरोव्यालःप्रत्ययःस
र्वदर्शनः॥१०॥ अजःसर्वेश्वरःसिद्धःसिद्धिः
सर्वादिरच्युतः॥ वृषाकपिरमेयात्मासर्वयो

गविनिसृतः॥११॥वसुर्वसुमनाःसत्यःसमात्मा
सम्मितःसमः॥अमोघःपुंडरीकाक्षोवृषकर्मावृ
षाकृतिः॥१२॥रुद्रोबहुशिराबभ्रुर्विश्वयोनिः
शुचिश्रवाः॥अमृतःशाश्वतःस्थाणुर्वरारोहो
महातपाः॥१३॥सर्वगःसर्वविद्भानुर्विष्वक्से
नोजनार्दनः॥वेदोवेदविदव्यंगोवेदांगोवेदवि
त्कविः॥१४॥लोकाध्यक्षःसुराध्यक्षोधर्माध्य
क्षःकृताकृतः॥चतुरात्माचतुर्व्यूहश्चतुर्दंष्ट्र
श्चतुर्भुजः॥१५॥भ्राजिष्णुर्भोजनंभोक्तासहि

ष्णुर्जगदादिजः॥अनघोविजयोजेताविश्वयो
निःपुनर्वसुः॥१६॥उपेंद्रोवामनःप्रांशुरमोघः
शुचिरूर्जितः॥अतींद्रःसंग्रहःसर्गोधृतात्मा
नियमोयमः॥१७॥वेद्योवैद्यःसदायोगीवीर
हामाधवोमधुः॥अतींद्रियोमहामायोमहो
त्साहोमहाबलः॥१८॥महाबुद्धिर्महावीर्यो
महाशक्तिर्महाद्युतिः॥अनिर्देश्यवपुःश्रीमा
नमेयात्मामहाद्रिधृक्॥१९॥महेष्वासोम
हीभर्ताश्रीनिवासःसतांगतिः॥अनिरुद्धः

वि०

सुरानंदोगोविंदोगोविदांपतिः॥२०॥मरीचिर्द
मनोहंसःसुपर्णोभुजगोत्तमः॥हिरण्यनाभःसु
तपाःपद्मनाभःप्रजापतिः॥२१॥अमृत्युःसर्व
दृक्सिंहःसंधातासंधिमान्स्थिरः॥अजोदु
र्मषणःशास्ताविश्रुतात्मासुरारिहा॥२२॥गुरु
र्गुरुत्तमोधामसत्यःसत्यपराक्रमः॥निमिषो
निमिषःस्रग्वीवाचस्पतिरुदारधीः॥२३॥अ
ग्रणीर्ग्रामणीःश्रीमान्न्यायोनेतासमीरणः॥स
हस्रमूर्द्धाविश्वात्मासहस्राक्षःसहस्रपात्॥२५ ६

सुप्रसादःप्रसन्नात्माविश्वधृग्विश्वभुग्विभुः
सत्कर्त्तासत्कृतिःसाधुर्जन्हुर्नारायणोनरः
२६॥असंख्येयोप्रमेयात्माविशिष्टःशिष्टकृ
च्छुचिः॥सिद्धार्थःसिद्धसंकल्पःसिद्धिदःसिद्धि
साधनः॥२७॥वृषाहीवृषभोविष्णुर्वृषपर्वावृ
षोदरः॥वर्द्धनोवर्द्धमानश्चविविक्तःश्रुतिसा
गरः॥२८॥सुभुजोदुर्द्धरोवाग्मीमहेंद्रोवसुदो
वसुः॥नैकरूपोबृहद्रूपःशिपिविष्टःप्रका
शनः॥२९॥ओजस्तेजोद्युतिधरःप्रकाशात्मा

वि० प्रतापन:॥ ऋद्ध:स्पष्टाक्षरोमंत्रश्चंद्रांशुर्भास्क
रद्युति:॥ ६०॥ अमृतांशूद्भवोभानु शशबिंदु:
सुरेश्वर:॥ औषधंजगत:सेतु:सत्यधर्मपराक्र
म:॥ ६१॥ भूतभव्यभवन्नाथ:पवनपावनो
नल:॥ कामहाकामकृत्कांत:काम:कामप्रद:
प्रभु:॥ ६२॥ युगादिकृद्युगावर्त्तोनैकमायोम
हाशन:॥ अदृश्योव्यक्तरूपश्चसहस्रजिदनं
तजित्॥ ६३॥ इष्टोविशिष्ट:शिष्टेष्ट:शिखंडी ७
नहुषोवृष:॥ क्रोधहाक्रोधकृत्कर्त्ता विश्व

बाहुर्महीधर:॥ ६४॥ अच्युत:प्रथित:प्राण:प्रा
णदोवासवानुज:॥ अपांनिधिरधिष्ठानमप्र
मत्त:प्रतिष्ठित:॥ ६५॥ स्कंद:स्कंदधरोधुर्योवर
दोवायुवाहन:॥ वासुदेवोबृहद्भानुरादिदेव:
पुरंदर:॥ ६६॥ अशोकस्तारणस्तार:शूर:शौ
रीर्जनेश्वर:॥ अनुकूल:शतावर्त्त:पद्मीपद्म
निभेक्षण:॥ ६७॥ पद्मनाभोरविंदाक्ष:पद्मग
र्भ:शरीरभृत्॥ महर्द्धिरृद्धोवृद्धात्मामहाक्षो
गरुडध्वज:॥ ६८॥ अतुल:शरभोभीम:समय

ज्ञोद्दविहरिः॥ सर्वलक्षणलक्षण्योलक्ष्मीवा
न्समितिंजयः॥ ३९॥ विक्षरोरोहितोमार्गोहेतु
र्दामोदरःसहः॥ महीधरोमहाभागोवेगवानमि
ताशनः॥ ४०॥ उद्भवःक्षोभणोदेवःश्रीगर्भःप
रमेश्वरः॥ करणंकारणंकर्त्ताविकर्त्तागहनो
गुहः॥ ४१॥ व्यवसायोव्यवस्थानःसंस्थान
दोध्रुवः॥ परर्धिःपरमस्पष्टस्तुष्टःपुष्टःशुभे
क्षणः॥ ४२॥ रामोविरामोविरजोमार्गोनेयो
नयोनयः॥ वीरःशक्तिमतांश्रेष्टोधर्मोधर्मवि

दुत्तमः॥ ४३॥ वैकुंठःपुरुषःप्राणःप्राणदः
प्रणवःपृथुः॥ हिरण्यगर्भःशत्रुघ्नोव्याप्तो
वायुरधोक्षजः॥ ४४॥ ऋतुःसुदर्शनःकालः
परमेष्ठीपरिग्रहः॥ उग्रःसंवत्सरोदक्षोवि
श्रामोविश्वदक्षिणः॥ ४५॥ विस्तारःस्थावरः
स्थाणुःप्रमाणंबीजमव्ययं॥ अर्थोनर्थोम
हाकोशोमहाभोगोमहाधनः॥ ४६॥ अनिर्वि
ण्णःस्थविष्ठोभूर्धर्मयूपोमहामखः॥ नक्षत्र
नेमिनक्षत्रीक्षमःक्षामःसमीहनः॥ ४७॥ यज्ञ

ईज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः ॥ सर्वदर्शी
विमुक्तात्मासर्वज्ञोज्ञानमुत्तमं ॥ ४८ ॥ सुव्रतःसु
मुखःसूक्ष्मःसुघोषःसुखदःसुहृत ॥ मनोहरो
जितक्रोधोवीरबाहुर्विदारणः ॥ ४९ ॥ स्वापनः
स्ववशोव्यापीनैकात्मानैककर्मकृत ॥ वत्सरो
वत्सलोवत्सीरत्नगर्भोधनेश्वरः ॥ ५० ॥ धर्मगुपध
र्मकृद्धर्मीसदसत्क्षरमक्षरं ॥ अविज्ञातासह
स्रांशुर्विधाताकृतलक्षणः ॥ ५१ ॥ गभस्तिनेमिः
सत्वस्थःसिंहोभूतमहेश्वरः ॥ आदिदेवोमहादे

वोदेवेशोदेवभृद्गुरुः ॥ ५२ ॥ उत्तरोगोपतिर्गो
प्ताज्ञानगम्यःपुरातनः ॥ शरीरभूतभृद्भोक्ताक
पींद्रोभूरिदक्षिणः ॥ ५३ ॥ सोमपोमृतपःसोमः
पुरुजित्पुरुसत्तमः ॥ जयोजयःसत्यसंधो
दाशार्हःसात्वतांपतिः ॥ ५४ ॥ जीवोविनयिता
साक्षीमुकुंदोमितविक्रमः ॥ अंभोनिधिरनं
तात्मामहोदधिशयोंतकः ॥ ५५ ॥ अजोमहा
र्हःस्वाभाव्योजितामित्रप्रमोदनः ॥ आनंदोनं
दनोनंदःसत्यधर्मात्रिविक्रमः ॥ ५६ ॥ महर्षिः

वि०

कपिलाचार्यः कृतज्ञो मेदिनीपतिः ॥ त्रिपद
स्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत् ॥ ५७
महावराहो गोविंदः सुषेणः कनकांगदी ॥ गु
ह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८ ॥
वेधाः स्वांगोजितः कृष्णो दृढः संकर्षणोच्युतः
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः
५९ ॥ भगवान् भगहानंदी वनमाली हलायु
धः ॥ आदित्यो ज्योतिरादित्यः सहिष्णुर्गति
सत्तमः ॥ ६० ॥ सुधन्वा खंडपरशुर्दारुणो द्रवि १०

णप्रदः ॥ दिविस्पृक् सर्वदृग्व्यासो वाचस्पति
रयोनिजः ॥ ६१ ॥ त्रिसामा सामगः साम निर्वाणं
भेषजं भिषक् ॥ संन्यासकृच्छमः शांतो निष्ठा
शांतिपरायणः ॥ ६२ ॥ शुभांगः शांतिदः स्रष्टा
कुमुदः कुवलेशयः ॥ गोहितो गोपतिर्गोप्ता वृ
षभाक्षो वृषप्रियः ॥ ६३ ॥ अनिवर्ती निवृत्तात्मा
संक्षेप्ता क्षेमकृच्छिवः ॥ श्रीवत्सवक्षाः श्रीवा
सः श्रीपतिः श्रीमतांवरः ॥ ६४ ॥ श्रीदः श्रीशः
श्रीनिवासः श्रीनिधिः श्रीविभावनः ॥ श्रीधरः

९

वि०

श्रीकरः श्रेयः श्रीमाल्लोकत्रयाश्रयः ॥ ६५ ॥ स्व
क्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः ॥ विजि
तात्मा विधेयात्मा सत्कीर्त्तिश्छिन्नसंशयः ॥ ६६ ॥
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ॥ भू
शयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ६७ ॥
अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः
अनिरुद्धोप्रतिरथः प्रद्युम्नोमितविक्रमः ॥ ६८ ॥
कालनेमिनिहा वीरः शौरीः शूरजनेश्वरः ॥ त्रि
लोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ११

६९ ॥ कामदेवः कामपालः कमी कांतः कृता
गमः ॥ अनिर्देश्यवपुर्विष्णुर्वीरोनंतो धनंज
यः ॥ ७० ॥ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मवि
वर्द्धनः ॥ ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्म
णप्रियः ॥ ७१ ॥ महाक्रमो महाकर्मा महातेजा
महोरगः ॥ महाक्रतुर्महायज्वा महायज्ञो मह
हविः ॥ ७२ ॥ स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तो
ता रणप्रियः ॥ पूर्णः पूरयिता पुण्यः पुण्यकी
र्त्तिरनामयः ॥ ७३ ॥ मनोजवास्तीर्थकरो वसु

वि० रेतावसुप्रदः॥वसुप्रदोवासुदेवोवसुर्वसुमना
हविः॥७४॥सद्गतिःसत्कृतिःसत्तासद्भूतिःसत्प
रायणः॥शूरसेनोयदुश्रेष्ठःसन्निवासःसुयाम
नः॥७५॥भूतावासोवासुदेवःसर्वासुनिलयो
नलः॥दर्पहादर्पदोदृप्तोदुर्धरोथापराजितः॥७६
विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान्॥अ
नेकमूर्त्तिरव्यक्तःशतमूर्त्ति[illegible]शता
ननः॥७७॥एकोनैकःसवःकःकिंयत्तत्पदमनु
त्तमं॥लोकबंधुर्लोकनाथोमाधवोभक्तवत्स १२

लः॥७८॥सुवर्णवर्णोहेमांगोवरांगश्चंदनांग
दी॥वीरहाविषमःशून्योघृताशीरचलश्चलः
॥७९॥अमानीमानदोमान्योलोकस्वामीत्रि
लोकधृक॥सुमेधामेधजोधन्यःसत्यमेधा
धराधरः॥८०॥तेजोवृषोद्युतिधरःसर्वशस्त्र
भृतांवरः॥प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगग
दाग्रजः॥८१॥चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूह
श्चतुर्गतिः॥चतुरात्माचतुर्भावश्चतुर्वेदविदेक
पात्॥८२॥समावर्त्तोनिवृत्तात्मादुर्जयोदुरति

९

वि०

क्रमः ॥ दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा
८३ ॥ शुभांगो लोकसारंगः सुतंतुस्तंतुवर्द्धनः ॥
इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४
उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः ॥ अ
र्को वाजसनः शृंगी जयंतः सर्वविज्जयी ॥ ८५
सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः ॥ म
हाह्रदो महागर्त्तो महाभूतो महानिधिः ॥ ८६ ॥ कु
मुदः कुंदरः कुंदः पर्जन्यः पावनो नलः ॥ अ
ताशो मृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८७ ॥ सु १२

लभः सुव्रतः सिद्धः शत्रुजि च्छत्रुतापनः ॥ न्य
ग्रोधोदुंबरोश्वत्थश्चाणूरांध्रनिषूदनः ॥ ८८ ॥
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ॥
अमूर्तिरनघोचिंत्यो भयकृद्भयनाशनः ॥ ८९
अणुर्बृहत्कृशस्थूलो गुणभृन्निर्गुणो महा
न् ॥ अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशव
र्द्धनः ॥ ९० ॥ भारभृत्कथितो योगी योगीशः स
र्वकामदः ॥ आश्रमः श्रमणः क्षामः सुपर्णो वा
युवाहनः ॥ ९१ ॥ धनुर्धरो धनुर्वेदो दंडो दम

यितादमः॥अपराजितः सर्वसहो नियंता नियमो
यमः॥९२॥सत्ववान्सात्विकः सत्यः सत्यधर्मप
रायणः॥अभिप्रायः प्रियार्होर्हः प्रियकृत्प्रीति
वर्द्धनः॥९३॥विहायसगतिर्ज्योतिः सुरुचि
र्हुतभुग्विभुः॥रविर्विरोचनः सूर्यः सवितार
विलोचनः॥९४॥अनंतो हुतभुग्भोक्ता सुख
दो नैकजोग्रजः॥अनिर्विण्णः सदामर्षी लोका
धिष्ठानमद्भुतः॥९५॥सनात्सनातनतमः क
पिलः कपिरव्ययः॥स्वस्तिदः स्वस्तिकृत्स्व

स्तिस्वस्तिभुग्स्वस्तिदक्षिणः॥अरौद्रः कुंड
लीचक्री विक्रम्यूर्जितशासनः॥शब्दातिगः
सब्दः सहः शिशिरश्शार्वरीकरः॥९७॥अक्रू
रः पेशलो दक्षो दक्षिणः क्षमिणांवरः॥विद्वत्त
मो वीतभयः पुण्यश्रवणकीर्त्तनः॥९८॥उत्ता
रणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः॥वीरहा
रक्षणः संतो जीवनः पर्यवस्थितः॥९९॥अनं
तरूपोनंतः श्रीजितमन्युर्भयापहः॥चतुर
श्रो गभीरात्मा विदिशो व्यादिशो दिशः॥१००॥

वि॰ अनादीर्भूर्भुवोलक्ष्मीःसुवीरोरुचिरांगदः॥ज
ननोजनजन्मादिर्भीमोभीमपराक्रमः॥१॥आ
धारनिलयोधाताषुष्पहासःप्रजागरः॥ऊर्ध्व
गःसत्पथाचारःप्राणदःप्रणवःपणः॥२॥प्र
माणंप्राणनिलयःप्राणभृत्प्राणजीवनं॥त
त्वंतत्वविदेकात्माजन्ममृत्युजरातिगः॥३
भूर्भुवःस्वस्तरुस्तारःसपिताप्रपितामहः॥
यज्ञोयज्ञपतिर्यज्वायज्ञांगोयज्ञवाहनः॥४॥
यज्ञभृद्यज्ञकृद्यज्ञीयज्ञभुग्यज्ञसाधनः॥य १५

ज्ञांतकृद्यज्ञगुह्यमन्नमन्नादएवच॥५॥आ
त्मयोनिःस्वयंजातोवैखानःसामगायनः॥दे
वकीनंदनःस्रष्टाक्षितीशःपापनाशनः॥६॥
शंखभृन्नंदकीचक्रीशार्ङ्गधन्वागदाधरः
रथांगपाणिरक्षोभ्यःसर्वप्रहरणायुधः॥७
सर्वप्रहरणायुधओंनमइति॥इतीदंकीर्त
नीयस्यकेशवस्यमहात्मनः॥नाम्नांसहस्रंदि
व्यानामशेषेणप्रकीर्तितं॥१॥यइदंशृणुया
न्नित्यंयश्चापिपरिकीर्तयेत्॥नाशुभंप्राप्नुया

वि॰ त्किंचित्सोमुत्रेह्चमानवः ॥२॥ वेदांतगोब्रा
ह्मणःस्यात्क्षत्रियोविजभवेत् ॥ वैश्योधन
समृद्धःस्यात्शूद्रःसुखमवाप्नुयात् ॥३॥
धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुया
त् ॥ कामानवाप्नुयात्कामीप्रजार्थीचाप्नुया
त्प्रजां ॥४॥ भक्तिमान्यःसदोत्थायशुचिस्त
द्गतमानसः ॥ सहस्रंवासुदेवस्यनाम्नामेत
त्प्रकीर्त्तयेत् ॥५॥ यशःप्राप्नोतिविपुलंज्ञाति
प्राधान्यमेवच ॥ अचलांश्रिय ॰ाप्नोतिश्रेयः २६

प्राप्नोत्यनुत्तमं ॥६॥ नभयंक्वचिदाप्नोतिवीर्यं
तेजश्चविंदति ॥ भवत्यरोगोद्युतिमान्बलरू
पगुणान्वितः ॥७॥ रोगार्त्तोमुच्यतेरोगाद्बद्धोमु
च्येतबंधनात् ॥ भयान्मुच्येतभीतस्तुमुच्येता
पन्नआपदः ॥८॥ दुर्गाण्यतितरत्याशुपुरुषः
पुरुषोत्तमं ॥ स्तुवन्नामसहस्रेणनित्यंभक्ति
समन्वितः ॥९॥ वासुदेवाश्रयोमर्त्योवासुदे
वपरायः ॥ सर्वपापविशुद्धात्मायातिब्रह्मसना
तनं ॥१०॥ नवासुदेवभक्तानामशुभंविद्यतेक्वचि

वि०

ते॥ जन्ममृत्युजराव्याधिभयंनैवोपजायते
११॥ इमंस्तवमधीयानःश्रद्धाभक्तिसमन्वितः
युज्येतात्मसुखक्षांतिश्रीधृतिस्मृतिकीर्त्तिभिः
१२॥ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः
भवंतिकृतपुण्यानांभक्तानांपुरुषोत्तमे॥१३॥
द्यौःसचंद्रार्कनक्षत्राखंदिशोभूर्महोदधिः॥
वासुदेवस्यवीर्येणविधृतानिमहात्मनः॥१४
ससुरासुरगंधर्वंसयक्षोरगराक्षसं॥जगद्
वशेवर्त्ततेदंकृष्णस्यसचराचरं॥१५॥इंद्रिया ७

णिमनोबुद्धिःसत्वंतेजोबलंधृतिः॥वासुदेवा
त्मकान्याहुःक्षेत्रंक्षेत्रज्ञमेवच॥१६॥आचा
रःप्रथमोधर्मोधर्मस्यप्रभुरच्युतः॥सर्वागमा
नामाचारःप्रथमःपरिकीर्त्तितः॥१७॥ऋषयः
पितरोदेवामहाभूतानिधातवः॥जंगमाजंग
मंचेदंजगन्नारायणोद्भवं॥१८॥योगोज्ञानं
तथासांख्यंविद्याशिल्पादिकर्मच॥वेदाः
शास्त्राणिविज्ञानमेतत्सर्वंजनार्दन॥१९॥ए
कोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः॥त्री

वि० ल्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः।
२०॥इमंस्तवंभगवतोविष्णोर्व्यासेनकीर्त्तितं
पठेद्यइच्छेत्पुरुषःश्रेयःप्राप्तुंसुखानिच॥२१
विश्वेश्वरमजंदेवंजगतःप्रभवाप्ययं॥भजंति
येपुष्कराक्षंनतेयांतिपराभवं॥२२॥एषनिः
कंटकःपंथायत्रसंपूज्यतेहरिः॥कुपथंतं
विजानीयाद्गोविंदरहितागमं॥२३॥अर्जुन
उवाच॥पद्मपत्रविशालाक्षपद्मनाभसुरो
म॥भक्तानामनुरक्तानांत्राताभवजनार्दन १८

२४॥श्रीभगवानुवाच॥योमान्नामसहस्रे
णस्तोतुमिछंतिपांडव॥सोहमेकेनश्लोके
नस्तुतएवनसंशयः॥२५॥नमोस्त्वनंताय
सहस्रमूर्त्तयेसहस्रपादाक्षिशिरोरुबाह
वे॥सहस्रनाम्नेपुरुषायशाश्वतेसहस्र
कोटीयुगधारिणेनमः॥२६॥रामरामेतिरा
मेतिरमेरामेमनोरमे॥सहस्रनामतत्तुल्यंरा
मनामवरानने॥२७॥नमोब्रह्मण्यदेवाय
गोब्राह्मणहितायच॥जगद्धितायकृष्णाय

गोविंदायनमोनमः॥२८॥वासनाद्वासुदेव
स्यवासितंभुवनत्रयं॥सर्वभूतनिवासोसि
वासुदेवनमोस्तुते॥२९॥आकाशात्पतितं
तोयंयथागच्छतिसागरे॥सर्वदेवनमस्कारः
केशवंप्रतिगच्छति॥३०॥इतिश्रीमहाभारते
शांतिपर्वणिदानधर्मेषुश्रीविष्णोर्दिव्यस
हस्त्रनामस्तोत्रंसंपूर्णमस्तु॥ ॥छ॥ ॥

॥श्रीगणेशायनमः॥जन्मेजयउवाच॥शरतल्पे
शयानस्तुभरतानांपितामहः॥कथमुत्सृष्ट
वान्देहंकंचयोगमधारयत॥१॥वैशंपायनउ
वाच॥श्रणुष्वावहितोराजन॥शुचिर्भूत्वास
माहितः॥भीष्मस्यकुरुशार्दूलदेहोत्सर्गमहा
त्मनः॥२॥निवृत्तमात्रेत्वयनेउत्तरेवैदिवाक
रे॥समावेशयदात्मानमात्मन्येवसमाहितः॥
३॥शुक्लपक्षस्यचाष्टम्यांमाघमासस्यपार्थि
व॥प्राजापत्येचनक्षत्रेमध्येप्राप्तेदिवाकरे

॥४॥विकीर्णांशुरिवादित्योभीष्मःशरशतैः
श्चितः॥शिश्येपरयालक्ष्म्यावृत्तोब्राह्मणसत्त
मैः॥५॥व्यासेनवेदविदुषानारदेनसुरर्षि
णा॥देवस्थानेनवात्स्येनतथाश्मकसुमंतुना
६॥तथाजैमिनिनाचैवपै[illegible]लेनचमहात्मना
शांडिल्यदेवलाभ्यांचमैत्रेयेणचधीमता॥७॥
शैवेनयाज्ञवल्क्येनकण्वेनलिखितेनच॥दे
वरातेनधीरेणदक्षमन्वत्रिशोनकैः॥८॥अ
सितेनवसिष्ठेनकौशिकेनमहात्मना॥हारी

भीष्म०
२

लो मत्राम्यांचतथात्रेयेणधीमता ॥ ९ ॥ बृह
स्पतिश्चशुक्रश्च च्यवनश्चमहामुनिः ॥ सन
त्कुमारकपिलोवाल्मीकिस्तुंबरुः कुरुः ॥
१० ॥ मौद्गल्यो भार्गवोरामस्तृणबिंदुर्महामु
नि ॥ पिप्पलादश्चवायुश्चसंवर्तपुलहः क
च ॥ ११ ॥ काश्यपश्चपुलस्त्यश्चक्रतुर्दक्षः
पराशरः ॥ मरीचिरंगिराः काश्यो गौतमो गा
लवामुनिः ॥ १२ ॥ धौम्योविभांडोमांडव्योधौ
म्यः कृष्णानुभौतिकः ॥ उलूकः परमोवि २१

स्तवराज

प्रोमार्कंडेयोमहामुनिः ॥ १३ ॥ भास्करिः पूरणः
कृष्णः सूतः परमधार्मिकः ॥ विश्वामित्रोवसि
ष्ठश्च दुर्वासाश्चमहात्मनः ॥ १४ ॥ एतैश्चान्यै
श्चमुनिगणै र्महाभागैर्महात्मनिः ॥ श्रद्धादम
पुरस्कारैर्वृतश्चंद्रइवग्रहैः ॥ १५ ॥ भीष्मस्तु
पुरुषव्याघ्र कर्मणामनसागिरा ॥ शरतल्प
गतः कृष्णंप्रदध्यौप्रांजलिः शुचिः ॥ १६ ॥ स्वर
णात्ष्टपुष्टेनतुष्टावमधुसूदनं ॥ योगेश्वरं
पद्मनाभंविष्णुंजिष्णुंजगत्पतिं ॥ १७ ॥ कृत्तां

जलिः स्तुतिभिर्न्नत्वा वाग्विदां प्रवरः प्रभुः ॥ भीष्मः
परमधर्मात्मा वासुदेवमथास्तुवत् ॥१८॥
भीष्म उवाच ॥ आरराधयिषुः कृष्णं वाचं जि
गदिषामिमां ॥ तथा व्याससमासिन्या प्रीय
तां पुरुषोत्तमः ॥१९॥ शुचिः शुचिपदं हंसं
तत्पदं परमेष्ठिनं ॥ युक्त्वा सर्वात्मनात्मानं तं प्र
पद्ये प्रजापतिं ॥२०॥ अनाद्यंतं परं ब्रह्म न दे
वा नर्षयो विदुः ॥ एकोयं वेद भगवान् धाता
नारायणो हरिः ॥२१॥ नारायणादृषिगण

स्तथा सिद्धमहोरगाः ॥ देवा देवर्षयश्चैव यं वि
दुः परमव्ययं ॥२२॥ देवदानवगंधर्वा यक्षरा
क्षसपन्नगाः ॥ यं न जानंति को ह्येष कुतो वा
भगवानिति ॥२३॥ यस्मिन् विश्वानि भूता
नि तिष्ठंति विशंति च ॥ गुणभूतानि भूतेश
सूत्रे मणिगणा इव ॥२४॥ यस्मिन्नित्ये तते तं
तौ दृढे स्रगिव तिष्ठति ॥ सदसद्ग्रथितं विश्वं
विश्वांगे विश्वकर्मणि ॥२५॥ हरिं सहस्रशि
रसं सहस्रचरणेक्षणं ॥ सहस्रबाहुमुकु

भिष्म० टंसहस्रवदनोज्ज्वलं ॥ २६ ॥ प्राङ्गुर्नारायणंदे
वंयंविश्वस्यपरायणं ॥ अणीयसामणीयांसं
स्थविष्ठंचस्थवीयसां ॥ २७ ॥ गरीयसांगरिष्ठं
चश्रेष्ठंचश्रेयसामपि ॥ यंवाकेष्वनुवाकेषु
निषत्सूपनिषत्सुच ॥ २८ ॥ गृणंतिसत्यकर्माणं
सत्यंसत्येषुसामसु ॥ चतुर्भिश्चतुरात्मानंस
त्वस्थंसात्वतांपति ॥ २९ ॥ यंदिव्यैर्दिव्यमर्चं
तियुक्तैःपरमनामभिः ॥ यस्मिन्नित्यंतपस्तप्तं
यदंगेष्वनुतिष्ठति ॥ ३० ॥ सर्वात्मासर्ववित्स २३

र्वःसर्वगःसर्वभावनः ॥ ३० ॥ यंसुरासुरगं
धर्वाःसिद्धाऋषिमहोरगाः ॥ प्रयातानित्यम
र्चंतिपरमंदुःखभेषजं ॥ ३१ ॥ यंदेवंदेवकी
देवीवसुदेवादजीजनत ॥ भौमस्यब्रह्मणो
गुप्तौदीप्तमग्निमिवारणिः ॥ ३२ ॥ यमनन्या
व्यपेताशीरात्मानंवीतकल्मषं ॥ दृष्ट्वानंत्या
यगोविंदंपश्यत्यात्मानमात्मनि ॥ ३३ ॥ पंच
कालविधानज्ञाद्वादशाक्षरचिंतकाः ॥ यत्र
भागवतायांतितद्विष्णोःपरमंपदं ॥ ३४ ॥ पुराणे

भीष्म॰ पुरुषंप्रोक्तंब्रह्मप्रोक्तंयुगादिषु॥ क्षयेसंकर्ष
णंप्रोक्तंतमुपास्यमुपास्महे॥२५॥ यमेकंबहु
धात्मानंप्रादुर्भूतमधोक्षजं॥ नान्यभक्ताः क्रि
यावंतोयजंतेसर्वकामदं॥२६॥ यमाहुर्जगतः
कोशंयस्मिन्संनिहिताःप्रजाः॥ यस्मिन्लोकाः
स्फुरंतीमेजलेशकुनयोयथा॥२७॥ ऋतमेका
क्षरंब्रह्मयत्तत्सदसतःपरं॥ अनादिमध्यपर्यं
तंनदेवानर्षयोविदुः॥२८॥ अनादिनिधनंदे
वमात्मयोनिंसनातनं॥ अप्रतर्क्यमविज्ञेयंह २४

रिंनारायणंप्रभुं॥२९॥ अतिवाय्विंद्रकर्माणं
मतिसूर्याग्नितेजसं॥ अतिबुद्धींद्रियात्मानंतंप्र
पद्येप्रजापतिं॥३०॥ यंवैविश्वस्यकर्तारंजगत
स्तस्थुषांपतिं॥ वदंतिजगतोध्यक्षमक्षरंपरमंपदं
॥३१॥ यंबृहंतंबृहत्युक्थेयमग्नौयंमहाध्वरे॥ यं
विप्रसंघागायंतितस्मैवेदात्मनेनमः॥३२॥ हिर
ण्यवर्णंयंगर्भमदितेर्दैत्यनाशनं॥ एकंद्वादश
धाजज्ञेतस्मैसूर्यात्मनेनमः॥३३॥ शुक्लेदेवा
न्पितॄन्कृष्णेतर्पयत्यमृतेनयः॥ यश्चराजा

शेष्म०

द्विजातीनांतस्मैसोमात्मनेनमः॥४४॥महतस्त
मसःपारेपुरुषंह्यतितेजसं॥यंज्ञात्वामृत्युमत्ये
तितस्मैज्ञेयात्मनेनमः॥४५॥ऋग्यजुःसामधा
मानंदक्षाद्यैर्हविराकृति॥यंसमस्तंतुतन्वंतित
स्मैयज्ञात्मनेनमः॥४६॥चतुर्भिश्चचतुर्भिश्च
द्वाभ्यांपंचभिरेवच॥हूयतेचपुनर्द्वाभ्यांतस्मै
यज्ञात्मनेनमः॥४७॥यंसुपर्णोयजुर्नामछंदो
गात्रस्त्रिवृच्छिराः॥रथंतरबृहत्सामतस्मै
स्तोत्रात्मनेनमः॥४८॥पादांगसंधिपर्वाणस्व २५

रव्यंजनभूषणं॥यमाहुरक्षरंनित्यंतस्मैवागा
त्मनेनमः॥४९॥यज्ञांगोयोवराहोवैभूत्वागामु
ज्जहारह॥लोकत्रयहितार्थायतस्मैवीर्यात्म
नेनमः॥५०॥यश्चिनोतिसतांसेवंऋतेनामृत
योनिना॥धर्मार्थव्यवहारार्थैतस्मैसत्यात्मने
नमः॥५१॥यंपृथग्धर्मचरणापृथग्धर्मफलेर
पि॥पृथग्धर्मैःसमर्चंतितस्मैधर्मात्मनेनमः॥
॥५२॥यतःसर्वप्रसूयंतेह्यनंगःसांगदेहिनः॥
उन्मादःसर्वभूतानांतस्मैकामात्मनेनमः॥५३॥

एतदव्यक्तमव्यक्तंविचिन्वंतिमहर्षयः ।। क्षेत्र
क्षेत्रज्ञमासीनंतस्मैक्षेत्रात्मनेनमः ।। ५४ ।। यंत्रि
धात्मानमात्मस्थावृतंषोडशाभिर्गुणैः ।। प्राहुः
सप्तदशंसांख्यास्तस्मैसांख्यात्मनेनमः ।। ५५
यंविनिद्राजितश्वासासद्दांताजितेंद्रियाः ।। ज्ञा
तासन्यासिनोयांतितस्मैमोक्षात्मनेनमः ।।
५७ ।। योसौयुगसहस्रांतेप्रदीप्तार्चिर्विभावसुः
संभक्षयतिभूतानितस्मैघोरात्मनेनमः ।। ५८
संभक्ष्यसर्वभूतानिकृत्वाचैकार्णवंजगत ।। बा

लः स्वपितियश्चैकस्तस्मैमायात्मनेनमः ।। ५९ ।।
सहस्रशिरसेतस्मैपुरुषायामितात्मने ।। चतुः
समुद्रपर्यंकेयोगनिद्रात्मनेनमः ।। ६० ।। यः शेते
शेषपर्यंकेदिव्यनागविभूषिते ।। फणासह
स्ररचितेतस्मैनिद्रात्मनेनमः ।। ६१ ।। अजस्य
नाभावप्येकेयस्मिन्विश्वंप्रतिष्ठितं ।। पुष्कर
पुष्कराक्षस्यतस्मैपद्मात्मनेनमः ।। ६२ ।। यस्य
केशेषुजीमूतानद्यः सर्वांगसंधिषु ।। कुक्षौ
समुद्राश्चत्वारस्तस्मैतोयात्मनेनमः ।। ६३ ।। वि

श्रीष्म०

ज्यपंचधात्मानंवायुर्भूत्वाशरीरग:॥यश्चेष्टय
तिभूतानितस्मैवाय्वात्मनेनम:॥६४॥योनिष
णोभवेद्रात्रौदिवाभवतिविष्ठित:॥द्रष्टाद
ष्टयस्ययोद्रष्टातस्मैद्रष्टात्मनेनम:॥६५॥य
स्मात्सर्वंप्रसूयंतेसर्गप्रलयविक्रिया:॥यस्मि
श्चैवप्रलीयंतेतस्मैहेत्वात्मनेनम:॥६६॥अहृ
टंसर्वकार्येषुधर्मकार्यार्थमुद्यतं॥वैकुंठस्य
चयद्रूपंतस्मैकार्यात्मनेनम:॥६७॥ब्रह्मवक्त्रं
भुजक्षत्रंकृत्स्नमूरूदरंविश:॥पादौयस्या २७

श्रिता:शूद्रास्तस्मैवर्णात्मनेनम:॥६८॥अन्नपा
नेधनमयोरसप्राणविवर्धन:॥योधारयतिभू
तानितस्मैप्राणात्मनेनम:॥६९॥प्राणानांधार
णार्थंचअन्नंभुक्तेचतुर्विधं॥अंतर्गत:पच
त्यन्नंतस्मैपाकात्मनेनम:॥७०॥विषयेवर्त्त
मानानांजंतुवैशेषिकैर्गुणै:॥प्राकृविषयंगोप्ता
रंतस्मैगोप्त्रात्मनेनम:॥७१॥अप्रमेयशरीरा
यसर्वतोनंतचक्षुषे॥अपारपरमेयायतस्मै
दिव्यात्मनेनम:॥७२॥सांख्ययोगैर्विनिश्चि

श्रिष्म० त्यसाध्योयः परमर्षिभिः ॥ यस्यनज्ञायतेतत्वंत
स्मैगुह्यात्मनेनमः ॥ ७३ ॥ यस्याग्निरास्यंद्यौर्मू
र्धाखंनाभिश्चरणौक्षितिः ॥ सूर्यश्चक्षुर्दिशःश्रो
त्रेतस्मैलोकात्मनेनमः ॥ ७४ ॥ युगेष्वावर्तते
योसौमासर्तुवत्सरायनैः ॥ तस्यप्रळयकर्ता
रंतस्मैकाळात्मनेनमः ॥ ७५ ॥ परःकाळात्
रोयज्ञात्परःसदसतश्चयः ॥ अनादिर्यादिवि
श्वस्यतस्मैविश्वात्मनेन ॥ ७६ ॥ पिंगेक्षण
टेयस्यरूपंदंष्ट्रानखायुधं ॥ दानवेंद्रांतकर २९

णंतस्मैदृप्तात्मनेनमः ॥ ७७ ॥ आत्मज्ञानमिदंसर्वं
ज्ञात्वापंचस्ववस्थितः ॥ यंज्ञानिनोधिगच्छंतितं
स्मैज्ञानात्मनेनमः ॥ ७८ ॥ पंचभूतात्मभूता
त्माभूतादिनिधनायच ॥ अक्रोधद्रोहमायाय
तस्मैचशांतात्मनेनमः ॥ ७९ ॥ योमोहयतिभू
तानिस्नेहरागादिबंधनैः ॥ सर्वस्यरक्षणार्था
यतस्मैमोहात्मनेनमः ॥ ८० ॥ आदौमात्स्येन
रूपेणजगतःस्थितिहेतवे ॥ उद्धाराद्धियोवे
दांस्तस्मैमत्स्यात्मनेनः ॥ ८१ ॥ पुनःकूर्मवपु

त्रिष्म०

र्भूत्वा अमृतार्थे तु केवलं ॥ योदधारच्चरौलेंद्रं त
स्मै कूर्मात्मनेनमः ॥ ८२ ॥ वाराहंरूपमास्थाय
महीं स्व वनपर्वतां ॥ उज्जहारेकदंष्ट्रेणतस्मैक्रो
डात्मनेनमः ॥ ८३ ॥ नारसिंहवपुः कृत्वासर्व
लोकभयंकरं ॥ हिरण्यकशिपुंजघ्नेतस्मै
सिंहात्मनेनमः ॥ ८४ ॥ वामनंरूपमास्थायब
लिंसंयम्यमायया ॥ त्रिलोकंक्रांतवान्यस्तु
तस्मैक्रांतात्मनेनमः ॥ ८५ ॥ जमदग्निसुतो
भूत्वारामः शस्त्रभृतांवरः ॥ कार्तवीर्यंज २९

घानस्सोतस्मैविप्रात्मनेनमः ॥ ८६ ॥ त्रिःसप्त
कृत्वोयः क्षत्रंनिजघ्नेस्मेरुषा ॥ क्रांतधर्म
मर्यादंतस्मैक्रोधात्मनेनमः ॥ ८७ ॥ रामोदाश
रथिर्भूत्वापौलस्त्यकुलहंतनः ॥ जघानरा
वणंसंख्येतस्मैरामात्मनेनमः ॥ ८८ ॥ गर्भेयो
सत्यरोहिण्यांधेनुकादीन्महासुरान् ॥ नि
जघ्नेबलभद्रोयंतस्मैरामात्मनेनमः ॥ ८९ ॥ ये
हलीमुसलीश्रीमान्नीलांबरधरधरस्स्वयंविः
रामयरोहिण्यायतस्मैशेषात्मनेनमः ॥ ९० ॥

विष्णु॰

चक्रिणागदिनेनित्यंलांगूलधरधारणे ॥ अनंत
बलभद्रायतस्मैभद्रात्मनेनमः ॥ ९१ ॥ वसुदे
वसुतःश्रीमान्गोकुलेक्रीडतेहरिः ॥ कंसस्य
चवधार्थायतस्मैकृष्णात्मनेनमः ॥ ९२ ॥ यस्मि
न्सर्वगतंसर्वंयःसर्वःस र्वतश्चयः ॥ यश्चस
र्वमयोनित्यंतस्मैसर्वात्मनेनमः ॥ ९३ ॥ क्षत्रि
याणांसहस्राणिप्रच्युतान्यर्बुदानिच ॥ योव
धीद्धारतेष्वुद्धेतस्मैक्रीडात्मनेनमः ॥ ९४ ॥ राक्ष
सानांविनाशायमूर्तिंचक्रेचतामसी ॥ शास्त्र ३०

चकारयोबौद्धंतस्मैबौधात्मनेनमः ॥ ९५ ॥ ब्रा
ह्मणस्यसुतोभूत्वाकल्किरूपेणयोहरिः ॥ कल्पां
तसंहरत्सर्वंतस्मैकल्क्यात्मनेनमः ॥ ९६ ॥ हनि
ष्यतकलावंतोम्लेछांतुरगवाहनः ॥ धर्मसंस्था
पनार्थायतस्मैयोगात्मनेनमः ॥ ९७ ॥ रसातल
गतःश्रीमाननंतोभगवान्विभुः ॥ सर्वंधारय
तेयोसौतस्मैवीर्यात्मनेनमः ॥ ९८ ॥ जटिनेनंदि
तेनित्यंलंबोदरशरीरिणे ॥ कमंडलुनिषण्णा
यतस्मैब्रह्मात्मनेनमः ॥ ९९ ॥ शूलिनेत्रिदशे

शेष्म० त्र्यायत्र्यंबकायमहात्मने॥ भस्मदिग्धोर्ध्वलिंगा
यतस्मैरुद्रात्मनेनमः॥१००॥ चंद्रार्द्धकृतशीर्षा
यव्यालयज्ञोपवीतिने॥ पिनाकशूलहस्ता
यतस्मैउग्रात्मनेनमः॥१०१॥ विश्वकर्मन्नम
स्तेस्तुविश्वात्मन्विश्वसंभव॥ अपवर्गोसि
भूतानांपंचानांपुरतःस्थितः॥२॥ नमस्तेत्रिषु
लोकेषुनमस्तेपारतंत्रिषु॥ नमस्तेदिक्षुसर्वा
सुत्वंहिसर्वपरायणं॥३॥ नमस्तेभगवन्विष्णो
लोकानांप्रभवाव्यय॥ त्वंहिकर्ताहृषीकेशसं

हर्ताचापराजितः॥४॥ तेनपश्यामितेदिव्यान्
भावान्सर्वेषुकर्मसु॥ तेनपश्यामितत्वेनयत्ते
रूपंसनातनं॥५॥ द्यौस्त्वयाशिरसाव्याप्ताप
द्भ्यांदेवीचमेदिनी॥ विक्रमेणत्रयोलोकाः
पुरुषोसिसनातनः॥६॥ नमोनरकसंत्रासर
क्षमंडलकारिणे॥ संसारनिम्नगावर्ततरिका
ष्ठायविष्णवे॥७॥ नमोब्रह्मण्यदेवायगोब्रा
ह्मणहितायच॥ जगद्धितायकृष्णायगोवि
दायनमोनमः॥८॥ प्राणकांतारपाथेयंसं

भीष्म०

सारछेदभेषजं॥ दुःखशोकपरित्राणं हरि
रित्यक्षरद्वयं॥ ९॥ अतसीपुष्पसंकाशंपीत
वाससमच्युतं॥ येनमस्यंतिगोविंदंनतेषांवि
द्यतेभयं॥ १०॥ द्विशोभुजारविश्वस्रुःवीर्यैः
श्चक्रःप्रजापतिः॥ सप्तमार्गनिरुद्धास्तेवायो
रमित्ततेजसः॥ ११॥ नारायणपरंब्रह्मनारा
यणपरंतपः॥ नारायणपरंसत्यंनारायण
परात्परं॥ १२॥ यथाविष्णुमयंसत्यंयथा
विष्णुमयोहरिः॥ यथाविष्णुमयंसत्यंपा २४

पंमेनश्यतांतथा॥ १३॥ त्वत्प्रपन्नायभक्ताय
गतिमिष्टांजिगीषवे॥ यच्छ्रेयःपुंडरीकाक्ष
तंध्यायस्वसुरोत्तम॥ १४॥ इतिविद्यातपो
योनिरयोनिर्विष्णुरीडितः॥ वाग्यज्ञेनार्चितोदे
वःप्रीयतांमेजनार्दनः॥ १५॥ वैशंपायनउवाच
एतावदुक्त्वावचनंभीष्मस्तद्गतमानसः॥ नमइ
त्येवकृष्णायप्रणामंचाकरोत्तदा॥ १६॥ अधिग
म्यतुयोगेनभक्तिंभीष्मस्यमाधवः॥ त्रैलोक्य
दर्शनंज्ञानंदिव्यंदत्वाययोहरिः॥ १७॥ तस्मिन्ना

भिष्म० परस्तेवाक्येततस्तेब्रह्मवादिनः॥ भीष्ममांगि
र्षेष्यकंवंसमर्च्चयमहामतिं॥१८॥ तस्तुवंतश्च
विप्राग्याकेशवंपुरुषोत्तमं॥ भीष्मंचशनकैः
सर्वैःप्रशशंसुःपुनःपुनः॥१९॥ विदित्वाभक्ति
योगंचभीष्मस्यपुरुषोत्तम॥ सहसोत्थायसंहृ
ष्टोयानमेवाभ्यपद्यत॥२०॥ केशवःसात्यकि
श्चैवरथेनैकेनजग्मतुः॥ अपरेणमहात्मानौ
युधिष्ठिरधनंजयौ॥२१॥ भीमसेनोयमश्चोभौ
रथमेकंसमाश्रितः॥ कृपोयुयुत्सुःसूतश्चसं २२

जयश्चापरंरथं॥२२॥ तैरथैर्नगराकारैःप्रया
ताःपुरुषर्षभ॥ नेमिघोषेणमहतिकंपयंती
वसुंधरां॥२३॥ ततोगिरःपुरुषवरस्तवान्वि
तोद्विजेरितःपथिसुमनाःसशुश्रुवे॥ कृतांज
लिंप्रणतमथापरंजनंसकेशिहामुदितम
नाभ्यनंदत॥२४॥ यंयोगिनःप्राणवियोगका
ले यत्नेनचित्तेविनिवेशयंति॥ तेवैपुरस्ताद्धरि
मीक्षमाणाःप्राणंजहौप्राप्तफलोहिभीष्मः॥
२५॥ स्तवराजमिमंपुण्यंव्यपेत्युसमाहितः॥

भिष्म० वैष्णवंलोकमाप्नोतिसत्यंसत्यंनसंशयः ॥ २६ ॥
स्तवराजजपंज्ञेयंविज्ञानाद्भुतदर्शनं ॥ गांगेयेन
पुरागीतंमहापातकनाशनं ॥ १२७ ॥ इतिश्रीम

हाभारतेशत ।
सहस्रसंहिता।
यांवैयासिक्यां
शांतिपर्वणिराज
धर्मेस्तवराजस्तो
त्रंसमाप्तं ॥ ७ ॥ २४

॥ श्रीगणेशायनमः ॥ अथअनुस्मृतिप्रारंभः ॥
॥ शतानीकउवाच ॥ महामतेमहाप्राज्ञसर्वशास्त्र
विशारद ॥ अक्षीणकर्मबंधस्तुपुरुषोद्विजसत्तम
॥ १ ॥ मरणेयज्जपंजाप्यंचभावमनुस्मरन् ॥ परंपद
मवाप्नोतितन्मेवदमहामुने ॥ २ ॥ शौनकउवाच
श्रीवत्सांकंजगद्बीजअनंतलोकसाक्षिणं ॥ पु
रानारायणंदेवंनारदःपर्यपृछत ॥ ३ ॥ श्रीनारद
उवाच ॥ भगवन्भूतभव्येशश्रद्दधानेर्जितेंद्रि
यैः ॥ कथंभक्तैर्विचिंत्योसिमरणेपर्युपस्थिते ॥ ४

अनुस्मृ॰ किंवाजाप्यंजपेन्नित्यंप्रातरुत्थायमानवः ॥ स्व
पन्विष्णुर्ध्यायेच्चतन्मेब्रूहिमहामतेः ॥ ५ ॥ भीष्म
उवाच ॥ श्रुत्वातस्यैवदेवर्षेर्वाक्यंवाक्यविशार
दः ॥ प्रोवाचभगवान्विष्णुर्नारदंजगतांपतिः ॥ ६
श्रीभगवानुवाच ॥ अहंतत्तेप्रवक्ष्यामिमुनेदि
व्यामनुस्मृतिं ॥ मरणेयामनुस्मृत्यप्राप्नोतिपर
मांगतिं ॥ ७ ॥ ॐकारमादितःकृत्वामामनुस्मृत्य
मन्मनाः ॥ एकाग्रःप्रयतोभूत्वाइमंमंत्रमुदीरये
त ॥ ८ ॥ ॐनमोभगवतेवासुदेवाय ॥ अस्यश्रीअनु २५

स्मृतिमहामंत्रस्यनारायणऋषिः ॥ परमात्माश्री
महाविष्णुर्देवता ॥ अनुष्टुप्छंदः मोक्षार्थेजपे
विनियोगः ॥ अनंतंशाश्वतंदेवमव्यक्तंपुरुषोत्त
मं ॥ प्रपद्येप्रांजलिर्विष्णुमच्युतंपुरुषोत्तमं ॥ ९ ॥ पुरा
णंपरमंविष्णुमद्भुतंलोकभावनं ॥ प्रपद्येपुंडरी
काक्षमीशानंसर्वानुकंपिनं ॥ १० ॥ लोकनाथंमह
द्भूतंमस्रंपुरुषोत्तमं ॥ शरण्यंशरणंभक्त्याप्रप
द्येभक्तवत्सलं ॥ ११ ॥ त्रिविक्रमंत्रिलोकेशंसर्वे
षांप्रपितामहं ॥ योगात्मकंमहात्मानंप्रपद्येतंज

नार्हनं ॥१२॥ आदिदेवमजंशंभुं व्यक्ताव्यक्तंस
नातनं ॥ नारायणमणीयांसंप्रपद्ये ब्राह्मणप्रियं
१३ ॥ लोकनाथंमहद्भूतंमक्षरंपरमंपदं ॥ भगवं
तंप्रपन्नोस्मिभूतभव्यभवत्प्रभुं ॥१४॥ स्रष्टारंसर्व
लोकानामनंतबलपौरुषं ॥ पद्मनाभंहृषीके
शंप्रपद्येध्रुवमीश्वरं ॥१५॥ हिरण्यगर्भंभूगर्भम
मृतंविश्वतोमुखं ॥ प्रभाकरमनाद्यंतंप्रपद्येभास्क
रद्युतिं ॥१६॥ सहस्रशिरसंदेवं वैकुंठंतार्क्ष्यवा
हनं ॥ प्रपद्येसूक्ष्ममचलंवरेण्यमभयप्रदं ॥१७॥

नारायणंनरंहंसंयोगात्मानंसनातनं ॥ शरण्यंस
र्वभूतानांप्रपद्येध्रुवमीश्वरं ॥१८॥ यःप्रभुःसर्व
भूतानांयेन सर्वमिदंततं ॥ चराचरगुरुर्देवःस
मेविष्णुःप्रसीदतु ॥१९॥ यस्माज्जातःपुराब्रह्मा
पद्मयोनिःप्रजापतिः ॥ प्रसीदतुसमेविष्णुःपिता
महपितामहः ॥२०॥ यःपुराप्रलयेप्राप्तेनष्टेस्था
वरजंगमे ॥ एकस्तिष्ठतियोगात्मासमेविष्णुःप्रसी
दतु ॥२१॥ अग्निःसोमार्कताराणांब्रह्मरुद्रेंद्रयो
गिनां ॥ यस्तेजयतितेजांसिसमेविष्णुःप्रसीदतु ॥२२

अनु० ग्राभीगर्भस्ययोगर्भस्तस्यगर्भस्ययोविष्णुः॥ विष्णुग
र्भस्ययोगर्भः सम्मेविष्णुः प्रसीदतु॥ २३॥ योगा
वासनमस्तुभ्यंसर्वावासवरप्रद॥ यज्ञगर्भमहा
भागयज्ञगर्भनमोस्तुते॥ २४॥ पर्जन्यः पृथिवी
सत्यंकालोधर्मक्रियाफलं॥ गुणाकारसमेव
ष्णुर्वासुदेवप्रसीदतु॥ २५॥ चतुर्भिश्चचतुर्भिश्च
द्वाभ्यांपंचभिरेवच॥ हूयतेचपुनर्द्वाभ्यांतस्मैय
ज्ञात्मनेनमः॥ २६॥ चतुर्मूर्तिपरंधामलक्ष्म्यावास
वरार्चित॥ सर्वाधिवासनाम्योस्तिवासुदेवात्मने २१

नमः॥ २७॥ चतुर्मूर्तिजमव्यक्तलक्ष्म्यावासवरप्र
द॥ सर्वावासनमस्तुभ्यंसाक्षिभूतजगत्पते॥ २८
अजेयखंडपरज्ञानविश्वमूर्तेवृषाकपे॥ वृषार्य
पंचकालज्ञनमस्तेज्ञानसागर॥ २९॥ यस्यहस्ते
गदाचक्रंगरुडोयस्यवाहनं॥ शंखःकरतले
यस्यसमेविष्णुःप्रसीदतु॥ ३०॥ अव्यक्तादंड
मुत्पन्नमव्यक्ताद्यःपरःप्रभुः॥ यस्मात्परतरं
नास्तिसमेविष्णुःप्रसीदतु॥ ३१॥ जितेंद्रियामहा
त्मानोज्ञानाध्यानपरायणाः॥ यंप्राप्यननिवर्तं

अनु०

तेतमस्मिञ्शरणंगतः ॥ ३२ ॥ चिंतयंतोपियंनित्यंब्र
ह्मेशानादयःप्रभुं ॥ निश्चयंनाधिगच्छंतितमस्मिञ्श
रणंगतः ॥ ३३ ॥ एकांशेनजगत्सर्वंयोवष्टभ्यव्यवस्थि
तः ॥ अग्राह्योनिर्गुणःसाक्षात्तमस्मिञ्शरणंगतः ॥ ३४
अव्यक्तश्चमहात्मात्वदुर्विज्ञेयःसनातनः ॥ आ
स्थितःप्रकृतिंभुंक्तेसमहात्माप्रसीदतु ॥ ३५ ॥ दि
वाकरस्यसोम्यंहिमध्येज्योतिरिवस्थितः ॥ क्षेत्र
ज्ञःपंचधाप्रोक्तःप्रकृतिर्वैत्रिगुणैः ॥ ३६ ॥ तमोगु
णंचयोभुंक्तेसमहात्माप्रसीदतु ॥ नमस्तेसर्वतो २०

नद्रसर्वसाक्षिशिरोमुखः ॥ ३७ ॥ सांख्ययोगाश्चये
चान्यसिद्धाश्चपरमर्षयः ॥ यंविदित्वाप्रमुच्यंते
समहात्माप्रसीदतु ॥ ३८ ॥ निर्विकारनमस्तेस्तु
साक्षिभूतहृदिस्थित ॥ अतींद्रियनमस्तेस्तुलिंगै
स्त्वमनुमीयते ॥ ३९ ॥ येतुत्वांनाभिजानंतिसंसा
रेसंसरंतिते ॥ रागद्वेषविनिर्मुक्तंलोभमोहविव
र्जितं ॥ ४० ॥ अव्यक्तंबुध्यहंकारोमहाभूतेंद्रिया
णिच ॥ त्वयितानितेषुत्वंतेषुतानिनतेत्वयि ।
॥ ४१ ॥ नमस्तेपुंडरीकाक्षपुनरेवनमोस्तुते ई

अनु०

स्रष्टाभोक्ताचकर्त्तृहरस्त्वोगुणानांप्रभुरीश्वरः॥अ
कर्त्ताहेतुरहितःप्रभुरात्मन्यवस्थितः॥४२॥न
मस्तेपुंडरीकाक्षपुनरेवनमोस्तुते॥ईश्वरोज
गतांनाथःकिमतःपरमुच्यते॥४३॥भक्तानां
यद्धितंदेवतद्ध्यायस्वसुरोत्तम॥मामेवभूतसं
योगःपुनर्भवतुजन्मनि॥४४॥अहंकारेण
बुध्यावातथासत्वादिभिर्गुणैः॥मामेवधर्मोधि
र्मैर्वापुनर्भवतुजन्मनि॥४५॥विषयैरिंद्रियैर्वा
पिनमेभूयात्समागमः॥पृथिवीयातुमेघ्राणंर २९

सनायातुमेजलं॥४६॥चक्षुर्द्दताश्चानंयातुस्प
र्शीयातुचमारुतं॥शब्दोप्याकाशमभ्येतुमनो
वैकारिकंतथा॥४७॥अहंकारश्चमेबुद्धिस्त्व
यिबुद्धिःसमेतुमे॥वियोगःसर्वकरणैर्गुणैर्भूतै
श्चयोभवेत्॥४८॥सत्वंरजस्तमश्चैवप्रकृतिंप्र
विशंतुमे॥निःकेवलंपदेकप्रयातिपरमंपदं॥४९
एकोभावस्त्वयामेस्तुममजन्मभवेत्पुनः॥नमो
भगवतेतस्मैविष्णवेप्रभविष्णवे॥५०॥त्वत्मना
स्त्वज्जतप्राणस्त्वच्चित्तस्त्वत्परायणः॥त्वामेवा

अनु० नुस्मरेदेवमरणेपर्युपस्थिते ॥ ५१ ॥ सर्वदेहस्थ
तायेमेव्याधयस्तेविनश्यंतुमे ॥ अर्द्दयंतुचदुःखा
निःप्रतिमुंचामियद्गुणात ॥ ५२ ॥ उपतिष्ठंतुमेरो
गायेमयासर्वेसंचिताः ॥ अनृणेनगंतुमिच्छामि
तद्विष्णोःपरमंपदं ॥ ५३ ॥ अहंभगवतस्तस्यम
मचासौसुरेश्वरः ॥ तस्याहंनप्रणश्यामिसच
मेनप्रणश्यतु ॥ ५४ ॥ कर्मेंद्रियाणिसंयम्यपंच
बुद्धींद्रियाणिच ॥ दशेंद्रियाणिमनसअहंका
रेतथामनः ॥ ५५ ॥ अहंकारंमनोबुद्धौबुद्धिमा ४०

त्मनियोजयेत ॥ यतोबुद्धींद्रियंपश्येतबुध्याबु
द्धेःपरःपरः ॥ ५६ ॥ ममायमितितस्याहंयेनचसर्व
मिदंततं ॥ आत्मान्चात्मनिसंयोज्यपरमात्मेति
चिंतयेत ॥ ५७ ॥ ततोबुद्धेःपरंबुध्वालभतेनपुन
र्भवं ॥ मरणेवाप्यनुप्राप्तेयस्त्वेवमामनुस्मरेत
५८ ॥ यदहंकारमाश्रित्ययज्ञदानतपःक्रियाः
कुर्वन्नफलमवाप्नोतिपुनरावर्त्तनंहितत ॥ ५९
नमोभगवतेतस्मैयेनसर्वमिदंततं ॥ तमेवच
प्रपन्नोस्मिममासौतस्यचाप्यहं ॥ ६० ॥ क्षमामम

अ०अनु०

न्तुस्मृतिंदिव्यांवैष्णवीपापनाशिनीं॥स्वपन्विबु
द्धोध्यायेद्यस्त्रिसंध्यंचापियःस्मरेत्॥६१॥अपि
पापसमाचारःसयातिपरमांगतिं॥पूर्णिमास्या
ममावास्यांसव्यातिपरमांगतिं॥६२॥ [redacted] ॥अर्चे
यन्नपियोदेवान्गृहेवापिबलिंददत्॥जुह्व
न्नग्नीन्स्मरेद्वापिलभतेपरमांगतिं॥॥६३॥श्रो
त्रयेच्छूद्रधानेभ्योयेचान्येमामुपाश्रिता॥नमद्   ४१

त्स्यवयोब्रूयान्मद्भक्तःश्रद्धयान्वितः॥६४॥तस्या
स्योभवेल्लोकःश्वपचस्यापिनारद॥किंपुन
र्येयजंतेमांसाधकाविधिपूर्वकं॥६५॥ध्यायं
तिचयथान्यायंतेयांतिपरमांगतिं॥अश्वमेध
सहस्राणांसहस्रंयःसमाचरेत्॥६६॥नासौ
तत्पदमाप्नोतिमद्भक्तैर्यदवाप्यते॥इष्टंदत्तंत
पोधीतंव्रतानिनियमाश्चये॥सर्वमेतद्विना
ज्ञानंज्ञानस्यांतोनविद्यते॥६७॥तस्मात्प्रदे
यंसाधकेभ्यःसर्वसत्वाभयंकरं॥दानादीन्यंत

वेतीहमद्भक्तोनंतमश्नुते॥ ६८॥ योदद्याद्गवा
ज्ञानंदद्याद्धर्मदेशनां॥ कृत्स्नांवापृथिवींद
द्यात्तत्तुल्यंनकदाचन॥ ६९॥ कांतारवनदु
र्गेषुसर्वास्वापत्सुसंगमे॥ दस्युभिःसंनिरुद्ध
श्चतंनामानिचकीर्त्तयेत्॥ ७०॥ वाराहोरक्षतु
जलेविषमेचैववामनः॥ अटव्यांनारसिंहस्तु
सर्वतःपातुकेशवः॥ ७१॥ सकृदुच्चरितंयेनह
रिरित्यक्षरद्वयं॥ बद्धःपरिकरस्तेनमोक्षायग
मनंप्रति॥ ७२॥ तस्मात्वमेवदेवर्षेध्यायस्वानंत ४२

माहृतः॥ अवाप्स्यसिततःसिद्धिंपदंद्रक्ष्यसिवै
ष्णवं॥ ७३॥ एकेसंन्यासिनोभक्तानिरागाःसर्व
कारिणः॥ ज्ञानाग्निदग्धकर्माणस्त्वाश्रयंतिवि
पश्चितः॥ ७४॥ अशरीराशरीरीस्त्वंसमंसर्वेषु
देहिषु॥ पुण्यपापविनिर्मुक्ताभक्तास्त्वांप्रविशं
तिते॥ ७५॥ एकंनान्यत्रभावस्थंयेविदुर्यांतिते
परं॥ समोहंसर्वभूतेषुनमेद्वेष्योस्तिनप्रियः॥ ७६
सर्वत्रचाभिकांक्षेद्देहजत्वाचैनान्यचेतसा॥ च
राचरमिदंविश्वंभूतग्रामचतुर्विधं॥ ७७॥ त्वया

अनु०

ध्येतज्जगद्ध्यासंस्तत्रेमणिगणाइव ॥ स्त्रष्टाभो
क्तासिकूटस्थोस्यतत्वस्तत्वसंज्ञकः ॥ ७८ ॥ अ
कर्त्ताहेतुरदितःपृथगात्माव्यवस्थितः ॥ नम
स्तेपुंडरीकाक्षपुनरेवनमोस्तुते ॥ ७९ ॥ ईश्व
रोसिजगन्नाथकिमतःपरमुच्यते ॥ भक्ताना
मुचितंदेवतध्यायस्वसुरोत्तम ॥ ८० ॥ इंद्रिया
णांगुणायांतुस्वेषुस्वेषुचयोनिषु ॥ पृथिवी
यातुसलिलमापोग्निमनलोनलं ॥ ८१ ॥ वायु
राकाशमभ्येतुतत्तथाकाशमेवच ॥ अहं ४३

कारंसमभ्येतुमोहनंसर्वदेहिनं ॥ ८२ ॥ सर्वमे
तद्धिनाबूयंतेज्ञानस्यात्तोनविद्यते ॥ मामेवतस्मा
देवर्षेध्याहिनित्यमतंद्रितः ॥ ८३ ॥ अनाश्यसि
ततःसिद्धिंप्राप्स्यसेपमंपदं ॥ अज्ञानायचयेयो
ज्ञेनंदत्वाधर्मोपदेशनं ॥ ८४ ॥ एवंसदेवदेवे
ननारदःप्रतिबोधितः ॥ प्रोवाचकेशवंभक्तिं
तथ्यात्वंकुरुभूपते ॥ ८५ ॥ इमांरहस्यांपरमाम
नुस्मृतिंह्यधीत्यसिद्धिंलभतेचनैष्ठिकीं ॥ विस
यदुःखानिविमुच्यसंकटात्सवीतरागोविच

अनु०

रेन्नमहीमिमां॥८६॥ आर्त्ता विषण्णाः शिथिला
श्च भीता घोरेषु च व्याधिषु वर्त्तमाना॥ संकीर्त्य
नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भ
वंति॥८७॥ किं तात वेदागमशास्त्रचिंतनै॥ स्ती
र्थैः समस्तैरपि किं प्रयोजनै॥ यद्यात्मनो वांछ
सि मुक्तिसंपद॥ गोविंद गोविंद इति स्फुरद॥
८८॥ भूतानि विष्णुर्भुवनानि विष्णुर्वनानि वि
ष्णुर्गहनानि विष्णुः॥ रात्रौ दिवा स्त्रीपुरुषेषु
विष्णुर्यदस्ति नास्ति तितदेव विष्णुः॥८९॥ सत्यं ४४

सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते॥ वेदशा
स्त्रात्परं नास्ति न देवः केशवात्परं॥९०॥ आलो
ड्य सर्वशास्त्राणि विचार्य च पुनः पुनः॥ इदमे
कं सुनिष्पन्नं ध्येयो नारायणः सदा॥९१॥ ज
न्मांतरसहस्रेषु तपोदानसमाधिभिः॥ नरा
णां क्षीणपापानां कृष्णे भक्तिः प्रजायते॥९२॥
प्रतिज्ञात च गोविंद मद्भक्तो नावसीदति॥ इति
संस्मृत्य संस्मृत्य प्राणान् संधारयाम्यहं॥९३
गोविंद द्वारकावास कृष्ण गोपीजनप्रिय॥ परे

स्कपरिभूतंमांकिंनजानासिकेशव ॥ ९४ ॥ गता
गतानिवर्त्ततेचंद्रसूर्यादयोग्रहा ॥ अद्यापिननि
वर्त्ततेद्वादशाक्षरचिंतकाः ॥ ९५ ॥ वासुदेवपरा
वेदावासुदेवपरामखाः ॥ वासुदेवपरादेवावा
सुदेवपराक्रियाः ॥ ९६ ॥ वासुदेवपरंज्ञानंवा
सुदेवपरंतपः ॥ वासुदेवपरोधर्मोवासुदेवपरा
गति ॥ ९७ ॥ नवासुदेवात्परमस्तिदैवतंनवासु
देवात्परमस्तिपावनं ॥ नवासुदेवात्परमस्ति
चिंतनंनवासुदेवंप्रणिपत्यसीदति ॥ ९८ ॥

ह्यस्मरताकृत्स्नमनुस्मरंति रात्रौचकृत्स्नंपुनरु
त्थिताये ॥ तेभिन्नदेहाःप्रविशंतिकृत्स्नंहवि
र्यथामंत्रहुतंहुताशे ॥ ९९ ॥ गोविंदेतिस
दास्नानंगोविंदेतिसदाजपं ॥ गोविंदेतिसदा
ध्यानं सदागोविंदकीर्तनं ॥ १०० ॥ इतिश्रीम
हाभारतेशांतिपर्वणिविष्णुधर्मोत्तरेशौनक
शतानीकसंवादेविष्णोर्वेदानुस्मृतिः
संपूर्णं ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

अनु